दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-244

1

27.06.2024 गुरुवासरः वि.सं. २०८० आषाढ़कृष्णषष्ठी आषाढः 13 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## ओमबिरला अनवरतं द्वितीयवारं लोकसभायाः अध्यक्षःचितः



**हिमसंस्कृतवार्ताः।** भारतीय जनतापार्टीतिदलस्य वरिष्ठनेता सांसदः च ओमबिरलाः अनवरतं द्वितीयवारं अष्टादश्याः लोकसभायाः अध्यक्षःचितः। असौ ध्वनिमतेन अध्यक्षपदाय चितः जातः। विपक्षदलेन अस्मैपदाय कांग्रेसदलीयः सांसदः के. सुरेशः स्वीय-प्रत्याशी उद्घोषितः परञ्च तस्य कृते अनेन दलेन सदने मतदानाय बलं न प्रदत्तम्। अध्यक्षपदस्य निर्वाचनान्तरं प्रधानमन्त्री नरेन्द्रमोदी विपक्षस्य च नेता राहुलगांधी अथ च संसदीयकार्यमन्त्री किरेन रिजीजूः श्रीबिरलाः अध्यक्षस्य आसनं समीपं नीतवन्तः। इतः पूर्वं यदा प्रातः सदनस्य उपवेशनं समारब्धम् तदा प्रधानमन्त्री अपि च राष्ट्रिय- जनतान्त्रिक-संयुतेः द्वादश अन्ये च नेतारः श्रीविरला इत्यस्मै अध्यक्षपदनिर्वाचनस्य प्रस्तावं प्रख्यापितवन्तः। विपक्षतः शिवसेनादलनेता अरविन्द सावन्तः राष्ट्रवादी-कांग्रेसपार्टीतिदलस्य सुप्रियासुले समाजवादी पार्टीदलस्य आनन्द-भदौरियाः च श्रीसुरेशस्य पक्षे प्रस्तावं प्रस्तावितवन्तः। निजोद्बोधने श्री ओमबिरलाः सदनस्य सर्वेभ्यः सांसदेभ्यः धन्यवादं प्रदत्तवान्। निर्वाचितः अध्यक्षः श्री बिरलाः अभिव्यक्तवान् यत् सदनगतमूल्यानां लोकतान्त्रिक परम्पराणां च समृद्धिः तस्य प्राथमिकता भविष्यति। असौ अग्रे अवोचत् यत् अष्टादश-लोकसभा अखिले हि विश्वे लोकतन्त्रस्य महती उत्सवानुकूला वर्तते। यतोहि चतुषष्टिकोट्यधिकाः मतदातारः सोत्साहं निर्वाचने भागं स्वीकृतवन्तः। अपि च विगतेषु दशवर्षेषु जनानां आकांक्षाः आशाः अपेक्षाश्च संवर्धिताः। एतत्सर्वं सांसदानां कर्तव्यमस्ति यत् तैः जनानां आकांक्षाः प्रभाविरीत्या सम्पूरणीयाः। अध्यक्षेण सबलं प्रतिपादितवान् यत् सदने गतिरोधं अतिरिच्य पारस्परिकी चर्चा विवादश्च करणीयः। अथ च विरोधस्य माध्यमः सदनस्य गरिम्णः अनुरूपो भवेत्। असौ पुनः प्रावोचत् यत् सदनस्य गरिमानं सीमानां च अनुकूलं स्थापयितुं एव सभापतिः कठोराचारणं समाचरति। ततः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी अध्यक्षपदाय निर्वाचिताय श्रीबिरलाइत्यस्मै शुभकामनाः अयच्छत्। उक्तवान् च यत् श्रीबिरलाइत्यस्य द्वितीयवारं पुनः निर्वाचिते सति प्रसन्नम् अनुभवामि। विपक्षस्य नेता राहुलगांधी अपि तस्मै वर्धापनानि प्रदत्तवान् प्रोदीरितवान् च यत् सदनमिदं जनानां ध्वनेः प्रतिनिधित्वं करोति। असौ श्री बिरला इत्यस्मै सदनस्य उचितसञ्चालने विपक्षस्य सहयोगस्य आश्वासनमपि प्रदत्तवान्।

## भारतेन सबलं प्रतिपादितं यत् स्थायि-अस्थायि श्रेण्ययोः विस्तारं कृत्वा संयुक्तराष्ट्र-सुरक्षापरिषदि संशोधनस्य समयः आगतः



हिमसंस्कृतवार्ताः। भारतेन सबलं प्रतिपादितं यत् स्थायि-अस्थायि-श्रेण्ययोः विस्तारं कृत्वा सुरक्षापरिषदि संशोधनस्य समयः आगतः। येन हि संस्थेयं वैश्विक संघर्षैः प्रभाविविधिना निवारयितुं सक्षमा भवेदिति। सुरक्षापरिषदः वार्षिक प्रतिवेदने संयुक्तराष्ट्र महासभायां चर्चावधौ भारतस्य प्रतिनिधिः प्रतीक माथुरः प्रोदीरितवान् यत् सुरक्षापरिषदि साम्प्रतमपि विश्वासस्य संवर्धनं अथ च प्रदर्शने संशोधनस्यावश्यकता दरीदृश्यते।

## केन्यायां नवकरप्रस्तावं अभिलक्ष्य प्रदर्शनकारिभिः संसत्भवने आक्रमणं विधाय तदीय एकः भागः अग्निसात् कृतः

हिमसंस्कृतवार्ताः। केन्यायां प्रदर्शनकारिभिः संसत्भवने आक्रमणं विधाय तदीय एकः भागः अग्निसात् कृतः। अनन्तरं आरक्षिणां कार्याचरणे पञ्च प्रदर्शनकारिणः मृताः। संसत्द्वारा एकस्य वित्त-विधेयकस्य अभ्युपगमनानन्तरं आदेशे विधेयकं विरूद्ध प्रदर्शनानि भवन्ति। अस्य विधेयकस्य द्वारा प्रशासनेन नैकेषु करेषु वृद्धिः कृता। जगतः नैकैः देशैः केन्यायां हिंसा चरणं आलक्ष्य चिंता प्रकटिता। जनेभ्यः शांति-स्थापनाय अभ्यर्थना कृता।

## तरणस्पर्धायां धनिधि-देसिंघुः श्रीहरि नटराजः च वैश्विक मानांकनस्य माध्यमेन पेरिस-ओलम्पिक स्पर्धायै स्थानं प्राप्तवन्तौ

हिमसंस्कृतवार्ताः। तरणस्पर्धायां धनिधि-देसिंधुः श्रीहरि नटराजः च वैश्विक मानांकनस्य माध्यमेन पेरिस- ओलम्पिक स्पर्धायै स्थानं प्राप्तवन्तौ। अस्मिन् संदर्भे भारतीयतरण-स्पर्धा-महासंघेन घोषणा कृता। फरवरी मासे फिलिपींस देशे आयोजितायां प्रति स्पर्धायां चतुर्दश वर्षीया धनिधिः महिलानां शतमीटर-स्पर्धायां चतुर्थ स्थानं प्राप्तवती। तत्रैव द्विशत-मीटर प्रति स्पर्धायां राष्ट्रीय-मानांक- धारकः नटराजः पुरुषाणां शतमीटर बैंक स्ट्रॉक इति स्पर्धायां स्वर्ण पदकं प्राप्तवान्।

## Priyanka Gandhi : शिमलां प्राप्ता प्रियंकागांधी, कर्तुं शक्नोति निर्वाचनप्रचारः



हिमसंस्कृतवार्ताः - शिमला। अखिलभारतीय काङ्ग्रेससमित्याः महासचिव प्रियङ्कागान्धी बुधवासरे अपराह्णे राजधानी शिमलानगरं प्राप्तवती। प्रियङ्का गान्धी इत्यस्याः निजनिवासः छराबड़ायां शिमला-नगरस्य समीपे अस्ति। प्रियङ्का चण्डीगढतः मार्गेण शिमलानगरं प्राप्तवती। प्रियङ्का गान्धी आगामिदिनद्वयं-त्रयं यावत् शिमलानगरे स्थातुं निश्चिता अस्ति। सम्भवति यत् प्रियङ्का गान्धी हिमाचल-देहरा-नालागढ-हमीरपुर-त्रिषु विधानसभाक्षेत्रेषु अपि उपनिर्वाचनस्य प्रचारं कर्तुं शक्नोति। काङ्ग्रेस-शीर्षनेतृत्वेन प्रियङ्कागान्धी इत्यस्याः नाम दलस्य तारक-अभियानकानां सूच्यां प्रथमस्थाने स्थापितं अस्ति। २०२२ तमे वर्षे सम्पन्नस्य विधानसभानिर्वाचनस्य समये, सद्यः एव आयोजिते लोकसभानिर्वाचने च प्रियङ्का गान्धी शिमलानगरस्य स्वगृहात् काङ्ग्रेसपक्षस्य प्रचारस्य प्रभारं स्वीकृतवती आसीत् दलस्य सूत्रेषु उक्तं यत् शिमलानगरे स्वस्य वाससमये प्रियङ्का गान्धी उपनिर्वाचनसम्बद्धानां केषाञ्चन नेतृभ्यः प्रतिक्रियां स्वीकरिष्यति, सर्वकाराय, संघटनस्य च कृते आवश्यकान् निर्देशान् अपि प्रसारयिष्यति।

## सुभाषितम्

**शास्त्राण्यधीत्यापि भवन्ति मूर्खा**
**यस्तु क्रियावान् पुरुषः स विद्वान्**
**सुचिन्तितं चौषधमातुराणां**
**न नाममात्रेण करोत्यरोगम् ।।**

भावार्थ- शास्त्रोंका अध्ययन [करने के बाद भी लोग मूर्ख रहते हैं। परन्तु जो कृतिशील हैं वही सही अर्थ में विद्वान हैं। किसी रोगी के प्रति केवल अच्छी भावना से निश्चित किया गया औषध रोगी को स्वस्थ नहीं कर सकता। वह औषध नियमानुसार लेने पर ही वह रोगी स्वस्थ हो सकता है।

*प्रतीकसाठ्चे मुम्बई*

## हिमसंस्कृतवार्ताः सामान्यज्ञानम्

**प्र. सम्राट- अशोकः कस्य उत्तराधिकारी?**
उत्तर : बिन्दुसारस्य

**प्र. भारतीयसंविधानं प्रथमतया कदा संशोधितम्?**
उत्तर : 1950 तमे वर्षे

**प्र. रोलेट-अधिनियमः कदा कार्यान्वितः?**
उत्तर : 1919 तमे वर्षे

**प्र. जैनसम्प्रदाये ........महावीरः मन्यते ?**
उत्तर : वास्तविकः संस्थापकः

**प्र. इसरो संस्थायाः मुख्यालयः कुत्रास्ति ?**
उत्तर : बैंगलोरनगरे

शिवानी शर्मा, हिमसंस्कृतवार्ताः

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## हिमाचले ३५०० टैक्सीयानानां अनुज्ञापत्राणि अनुमोदितानि

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशराज्य-परिवहनप्राधिकरणस्य बुधवासरे गोष्ठी अभवत्। अस्यां गोष्ठ्यां ३५०० टैक्सी-यानानां अनुज्ञापत्रं दातुं अनुमोदनं दत्तम्। सभायाः अध्यक्षता परिवहनविभागस्य प्रमुखसचिवः आर.डी. नजीमः अकरोत्। हिमाचलप्रदेशे लोकसभा-विधानसभा-निर्वाचनानां कारणात् टैक्सी-यानानां अनुज्ञापत्र-निर्गमनस्य विषयः प्रायः पञ्चमासान् यावत् लम्बितः आसीत्। सभायां ई-टैक्सी योजनायाः विषये अपि चर्चा अभवत्। प्रथमचरणस्य ११४ युनः ई-टैक्सी-यानस्य अनुदानं प्राप्स्यन्ति। हिमाचलसर्वकारः अनुदानं प्रदास्यति। अनुद्योगी-युवभ्यः सुलभशर्तैः ऋणं प्राप्यते। युनः केवलं १० प्रतिशतं धनेन ई-टैक्सी प्राप्तुं शक्नुवन्ति। एतानि टैक्सीयानानि सर्वकारीयविभागेषु नियोजितानि भविष्यन्ति। परिवहनविभागस्य अन्तर्गतम् अस्याः योजनायाः कृते कुलम् ५०० युनां चयनं कृतम् अस्ति। अनुज्ञापत्राणां निर्गमनात् पूर्वं जनाः वाहनानि क्रीतवन्तः इति उल्लेखनीयम्। जनानां एतानि वाहनानि निरुद्धानि आसन्। बालकान् विद्यालयं प्रति नेतुम् जनाः बसयानानि क्रीतवन्तः आसन्, परन्तु अनुज्ञापत्राणि न निर्गतानि आसन्। टैक्सी-अनुज्ञापत्रं प्राप्य अनुद्योगी युनः स्वरोजगारं कर्तुं शक्नुवन्ति।

# मध्यावधिः निर्वाचनम्- नामाङ्कननिवृत्तेः अनन्तरं अधुना १३ अभ्यर्थिनः स्पर्धायाम्




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
निर्वाचनविभागस्य प्रवक्ता अवदत् यत् त्रिषु विधानसभाक्षेत्रेषु आयोज्य-उपनिर्वाचनेषु नामाङ्कनानां निवृत्तेः अनन्तरं अधुना आहत्य १३ अभ्यर्थिनः स्पर्धायाम् सन्ति। अधिकाधिकं सूचनां दत्त्वा प्रवक्ता अवदत् यत् देहरायां कोऽपि अभ्यर्थी नामाङ्कनं न निष्कासितवान् अत्र च कुलम् पञ्च, हमीरपुरे अधुना निर्दलीयप्रत्याशी प्रदीपकुमारस्य नामाङ्कनस्य निवृत्तेः अनन्तरं त्रयः तथा च नालागढनगरे अधुना निर्दलीयप्रत्याशी गुरनामस्य नामाङ्कनस्य निवृत्तेः अनन्तरं पञ्च अभ्यर्थिनः निर्वाचनक्षेत्रे सन्ति।



## विधानसभानिर्वाचनक्षेत्रं देहरा

कांगड़ाजनपदस्य देहरा विधानसभानिर्वाचनक्षेत्रे भारतीयराष्ट्रीयकांग्रेसस्य कमलेश (53), भारतीयजनतापार्टीति दलस्य होशियारसिंहः (57), एवं निर्दलीया प्रत्याशी सुलेखादेवी (59), अरुण अंकेश स्यालः (34) एवं अधिवक्ता संजय शर्मा (56) च निर्वाचनस्पर्धायां सन्ति।




## विधानसभाक्षेत्रं हमीरपुरम्

हमीरपुरविधानसभाक्षेत्रे भारतीय- जनतापार्टीति दलस्य आशीष शर्मा (37), भारतीयराष्ट्रीयकांग्रेसस्य डॉ. पुष्पिन्दरवर्मा (48) तथा निर्दलीयः प्रत्याशी नंदलालशर्मा (64) च निर्वाचनस्पर्धायां सन्ति।

## नालागढ़ विधानसभाक्षेत्रम्

नालागढ़विधानसभाक्षेत्रे भारतीय- राष्ट्रीयकांग्रेसस्य हरदीपसिंहबावा (44) , भारतीयजनतापार्टीति दलस्य के.एल.ठाकुरः (64), स्वाभिमानपार्टीति दलस्य किशोरीलालः शर्मा (46) तथा निर्दलीय प्रत्याशी हरप्रीतसिंहः (36) विजयसिंहः (36) निर्वाचनस्पर्धायां सन्ति।

# अनियन्त्रितं भूत्वा बहिः गभीरे गर्ते पतितं बोलेरोकैंपरयानम्, एकः स्थले एव मृतः, द्वौ घातितौ




**हिमसंस्कृतवार्ताः - शिमला ।** शिमलामण्डलस्य झाकड़ीक्षेत्रे गानवीस्थानस्य समीपे एकं बोलेरो-कैम्परयानं अनियंत्रितं भूत्वा गभीरे गर्ते पतितम्। दुर्घटनायां एकः व्यक्तिः स्थले एव मृतः, द्वौ जनौ घातितौ। मृतस्य पत्नी अपि आहतानाम् अन्तर्भवति । उभौ चिकित्सायाम् खनेरी-चिकित्सालये प्रवेशितौ स्तः । मृतकः मोलागीनिवासी ४८ वर्षीयः रामलालः इति ज्ञातः अस्ति । दुर्घटनायां मृतकस्य पत्नी राधादेवी चालकः अर्जुन (३४) च घातितौ। मंगलवासरे सायं विलम्बेन घटितायाः अस्य दुर्घटनायाः कारणं चालकस्य प्रमादात् प्रकाशं प्राप्तम्।
सूचनानुसारं बोलेरो कैम्परयानं कोटलु- ज्यूरीतः मोलागीं प्रति गच्छति स्म । बोलेरो-याने दम्पती सहितं चत्वारः जनाः आसन् । येषु मोलागी निवासी रामलालः (48), राधादेवी, पत्नी रामलालः, चालकः अर्जुन (34) तथा बगड़ूरामः (43) आसन् । रामलालः गृहकार्यम् आरब्धवान् आसीत् इति कथ्यते, तदर्थं सः बोलेरो-कैम्परयाने वालुकापुटं वहति स्म । यदा बोलेरो गान्वीस्थानं प्राप्तवान् तदा बोलेरो आरोहणकाले अग्रे गन्तुं न शक्तम्, सहसा पृष्ठपोषणं कर्तुं आरब्धवान् । तदा बोलेरोयाने आरुढ़ बगड़ूरामः पृष्ठस्य चक्रस्य उपरि शिलास्थापनार्थं बोलेरोतः अवतरत् । परन्तु बोलेरो द्रुतगत्या पृष्ठतः गत्वा मार्गात् प्रायः ७० मीटर् अधः स्थिते गानवी-गर्ते पतितम्। सडकदुर्घटनायां रामलालस्य स्थले एव मृत्युः अभवत्, राधादेवी चालकः अर्जुनः च घातिताः अभवन् ।
दुर्घटनाविषये सूचनां प्राप्य पुलिसदलं तत्स्थानं प्राप्य आश्रय-उद्धार-कार्यक्रमं आरब्धवान् । पुलिसैः शवस्य ग्रहणं कृत्वा अग्रे कार्यविधिः आरब्धा अस्ति। चालकस्य प्रमादपूर्वकं वाहनचालनस्य कारणेन मार्गदुर्घटना अभवत् इति पुलिसैः प्रारम्भिकं अन्वेषणं कृतम् अस्ति। अपरपक्षे डीएसपी रामपुरस्य नरेशशर्मा कथयति यत् पुलिसैः शवं शवपरीक्षणार्थं प्रेषितः। डीएसपी इत्यनेन उक्तं यत् पुलिसैः मार्गदुर्घटनायाः विषये २७९, ३३७, ३०४ ए आईपीसी इत्यस्य अन्तर्गतं प्रकरणं पञ्जीकृत्य अग्रे कार्यविधिः आरब्धा अस्ति।

# अधुना देशस्य कस्मिन् अपि पुलिस-स्थानके प्राथमिकी (FIR) दातुं शक्यते




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
जुलैमासस्य प्रथमदिनात् आरभ्य देशे सर्वत्र त्रीणि नवीनानि आपराधिकविधानानि कार्यान्वितुं गच्छन्ति। पुरातनविधानानां स्थाने भारतीयन्यायसंहिता, भारतीयनागरिकरक्षासंहिता, भारतीयसाक्ष्याधिनियमः च स्थापिताः भविष्यन्ति। नूतननियमेषु कस्यापि अन्वीक्षणस्य, ग्रहणस्य च सन्दर्भे पुलिसैः विडियोरिकार्डिङ्ग-इति कर्तुं अनिवार्यं कृतम् अस्ति। अधुना कोऽपि व्यक्तिः पुलिस-स्थानम् न गत्वा ई-एफआईआर-प्रयोगं कर्तुं शक्नोति। पीडितायाः विरुद्धं एफआईआर-प्रदानस्य अधिकारक्षेत्रस्य दायित्वं नूतनेषु विधानेषु निरस्तम् अस्ति। पीडिताः देशस्य कस्मिन् अपि पुलिस-स्थानके प्राथमिकीम् अङ्कयितुं शक्नुवन्ति। पुलिसकर्मचारिणः एतत् प्रतिकारं कर्तुं न शक्ष्यन्ति। बुधवासरे उपायुक्तकार्यालयस्य बचतभवने गृहमन्त्रालयेन सूचनाप्रसारणमन्त्रालयेन च कार्यशाला आयोजिता। मुख्यातिथिरूपेण आईपीएस-अधिकारी अतिरिक्तपुलिस महानिदेशकः अभिषेकः त्रिवेदी आसीत् । कार्यक्रमे संसाधनव्यक्तिरूपेण आईपीएस अधिकारी समादेशकः एचपीएपी-वाहिनी जुंगा रोहित मालपानी, राष्ट्रीयविधिविश्वविद्यालयस्य आचार्यः डॉ. गिरीशशुक्लः एवं सहाचार्यः डॉ. संतोषकुमारशर्मा च उपस्थिताः अभवन्।

## साक्षिणः, पीडिताः, अभियुक्ताः च आभासीयमाध्यमेन उपस्थिताः भवितुम् अर्हन्ति

नूतनविधानस्य कार्यान्वयनानन्तरं कस्यापि आपराधिकविधानसम्बद्धाः पीडिताः, साक्षिणः, अभियुक्ताः च विवेचनस्य समक्षं उपस्थिताः भूत्वा निर्धारितस्थाने आभासीयमाध्यमेन (वीडियो कान्फ्रेंस) साक्ष्यं दातुं शक्नुवन्ति। ९० दिवसेषु कस्यापि अन्वेषणस्य प्रगतेः विषये पुलिसं सूचयितुं अनिवार्यं भविष्यति। प्रकरणसम्बद्धानि अभिलेखानि निर्धारितसमये ईमेलद्वारा प्राप्तुं शक्यन्ते। डॉ. संतोषकुमारशर्मा उक्तवान् यत् नूतनानि विधानानि १६३ वर्षपुरातनानां विधानानां स्थाने स्थास्यन्ति, तस्य उद्देश्यं दण्डं न अपितु न्यायं दातुं वर्तते। प्रो. गिरीशशुक्लः- जनानाम् शीघ्रं न्यायं प्रदातुं नूतनविधानेषु बहवः प्रावधानाः कृताः सन्ति। इलेक्ट्रॉनिकसाक्ष्यस्य उपयोगेन जनानां कृते शीघ्रं न्यायं प्रदातुं बलं दत्तम् अस्ति।

## हिमाचलः सज्जः, पुलिस-कर्मचारिभ्यः दीयते प्रशिक्षणम्

कार्यशालायाः मुख्यातिथिः अतिरिक्तपुलिसमहानिदेशकः अभिषेकः त्रिवेदी अवदत् यत् राज्यस्य पुलिसविभागः त्रीणि नवीनविधानानि कार्यान्वितुं पूर्णतया सज्जः अस्ति। अस्य कृते विभागः बहुकालात् सज्जतां कुर्वन् अस्ति। अस्मिन् विषये सर्वेषां स्तरानाम् पुलिसकर्मचारिणां प्रशिक्षणं क्रियते। नूतनविधानानां विषये जनानां मध्ये जागरूकतां जनयितुं जुलै १ दिनाङ्के पुलिसस्थानकेषु विशेषकार्यक्रमानाम् आयोजनं भविष्यति।

# मौसमविज्ञानकेन्द्रम् - प्रतिहोरां ५० किलोमीटर वेगेन प्रवहति वायुः



**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशस्य ऋतुविज्ञानविभागेन २९ जूनतः प्रचण्डवृष्टिः भविष्यति इति सचेतना दत्ता। एषः वर्षाक्रमः सम्पूर्णे राज्ये त्रिदिवसाभ्यधिकं यावत् निरन्तरं भविष्यति। राज्ये २८ जूनतः २ जुलैपर्यन्तं निरन्तरं वर्षा भविष्यति। अस्मिन् काले वज्रपातस्य पीत-सचेतना अपि निर्गता, जून-मासस्य २८ तः ३० पर्यन्तं प्रचण्डवृष्टेः पीत-सचेतना अपि कृता अस्ति ऋतुविज्ञानविभागस्य अनुसारम् अस्मिन् काले मानसूनस्य प्रवेशस्य अपि सम्भावना वर्तते । अस्मिन् काले प्रतिहोरान ४० तः ५० किलोमीटर् वेगेन वायुः प्रवहति । तेन सह विद्युद्गर्जनयोः सम्भावना अपि भवति ।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

27.06.2024 गुरुवासरः वि.सं. २०८० आषाढ़कृष्णषष्ठी आषाढः 13 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# क्वास्ति स ब्रह्मरूपः आनन्दः ?



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

एतद्विचारणीयं यत् जीवानाम् आनन्दप्राप्तेः प्रयासः अनादिकालतो हि प्रवर्तमानोऽस्ति चेदपि तेषाङ्कृते स दुर्लभो हि स्यात् सदा।

वस्तुतो अद्यावधि अस्माभिः सः आनन्दो न प्राप्तः, यतोहि वयं नावगतवन्तो यत् अस्माकं लक्ष्यं किम् ? किमिच्छन्तः स्मो वयम् ? विना विचारं हि यदृच्छया संसारे वयं धावन्तः स्मः। को वा स आनन्दः ? क्वास्ति ? कथं प्राप्स्यते ? वेदानुसारं 'यो वै भूमा तत्सुखम्' इति अर्थात् आनन्दः सदा अनन्तमात्रायां भवति, नित्यो भवति, अर्थात् सकृत् तस्य परमानन्दस्य प्राप्तेरनन्तरं पुनर्दुःखं न बाधते।

आनन्दप्राप्तौ मुख्यतो धारणाद्वयं वर्तते – भौतिकवादः, अध्यात्मवादः चेति। भौतिकवाददृष्ट्या एतत् जगद्धि सत्यं प्रतिभाति। शारीरिकेच्छानां पूर्त्यर्थम् अत्रैव जीवः आनन्दं मार्गयति। अभिलषितपदार्थानां प्राप्तौ हि सुखम् अनुभवति स जीवः। परन्तु सर्वेषाम् अनुभवसिद्धविषयो यत् तत्पदार्थानाम् उपयोगस्य पश्चात् ततः तृप्तिः, शान्तिर्वा न कदापि कस्यापि सम्भवदिति, अपितु उत्तरोत्तरं तद्वर्धमाना हि भवेत्। 'बुझै न काम अगिनि तुलसी कहुं बिषय भोग बहु घी ते' इति। दृढसिद्धान्तो यत् भौतिकवादेन अन्तःकरणस्य सुखशान्त्यादिसमस्यायाः न कदापि निराकरणं सम्भवति।

वेदो निगदति - 'रसो वै सः। रसः ह्येवायं लब्ध्वाऽऽनन्दी भवति।' इति अर्थात् ईश्वरो हि आनन्दः, तत्प्राप्य जीवः आनन्दमयो जायते। 'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय।' अर्थात् तं परमेश्वरं विज्ञाय हि जीवो दुःखाद् उत्तीर्णो भूत्वा सुखी भवितुमर्हति, एतदतिरिच्य नान्यमार्गः। अर्थात् अध्यात्मक्षेत्रे हि आनन्दः उपलभ्यते, न वा संसारे इति, शम्।

## पहाड़ी गल्लां

हिमसंस्कृतवार्ताः

### तकाल़ बेला



आदमी हो या हो पशु पंखी पंखेरू
कमाणे खातर पूरा दिन रैहन्दे घरा ते बाहर
संजका जून तांजे औन्दा हुंदियाँ तकाल बेला
तां सब दौड़दे घरा जो पंछी
मारदे लम्बी उड़ार

पावें नौकरी करे कोई या करे दुकान
संज हुई कि आई जाँ घरा रा ध्यान
छोड़ छोड़ कराएं अपना कम्म निपटाणे री
बड़ा बुरा लगदा जे पई जाए ऐन मोके पर कोई कमसाहण

बुरा एह जे लगिरा पापी पेट
बईरी रगड़ोड किते हुई न जाये लेट
तकाल बेला हुई गई क्या करिए
हुन फटाफट अपना समान समेट

तकाल़ बेला जानवर बी घरा जो दौड़दे
सबीं जो औन्दा याद अपणे बाल बच्चे घरवार
आंधी तूफान बरखा रा छैब्बर पावें हो कितना जोरदार
लम्बी लम्बी भरदे गईयाँ तेज हुई जांदी रफ्तार

माहणु हो या पशु पक्षी सबीं जो याद औन्दा अपणा बसेरा
सब पहुँचदे अपने घरें चाहे लोय हो या हो नेहरा
कोई नियाँ तिसजो जे घरा री याद नी औंदी
अपने घरा कने सबीं जो लगाव हुँदा बथेरा

रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र

# तमिलमहाकाव्यस्य शिलप्पादिकारम् इत्यस्य मुख्यकेन्द्रसमस्ति कन्नगी

कन्नगी तमिलमहाकाव्यस्य शिलप्पादिकारम् इत्यस्य केन्द्रीयभूमिकायाः वैश्यमहिला अस्ति। मदुरै-नगरस्य पाण्डियनराज्ञा प्रतिशोधं कथं कृतवान् इति कथायां चित्रितम् अस्ति यः तस्याः पतिं दोषं विनैव मारितवान्। जैनराजकुमारः इलाङ्गो आदिगल इत्यनेन लिखितस्य तमिलमहाकाव्यस्य शिलप्पादिकारम् इत्यस्य सा मुख्यपात्रमस्ति कन्नगी। यदा तस्याः पतिः पाण्ड्याराज्ञेन चौर्यकर्मणि पाशेबद्धः, दण्डितश्च तदा कन्नगी तस्य निर्दोषतां सिद्धं कृतवती किञ्च राजानं मदुरैनगरं च शापितवती। कन्नगी कदाचित् देवीरूपेण पूजिता अस्ति। अस्मिन् विषये प्रचलिता एका कथा वर्तते।

प्राचीनकाले चोलराज्यस्य व्यापारिकतटे पुहार-नगरे माकट्टुवन-नामकः धनाढ्यः व्यापारी निवसति स्म। तस्य कोवलन् इति पुत्रः आसीत्, यस्य विवाहः पुहारनगरस्य अन्यस्य धनिकस्य वणिक् इत्यस्य मनायिकनस्य पुत्र्या कन्नगी इत्यनया सह अभवत्। प्रथमानि कतिचन वर्षाणि ते महता प्रेम्णा, सुखेन च व्यतीतवन्तः। एकदा कोवलनः पुहारस्य प्रसिद्धायाः नर्तक्याः माधव्याः नृत्यं द्रष्टुं गत्वा तस्याः सौन्दर्येन मुग्धः अभवत्। सः माधव्याः कृते १००० सुवर्णमुद्राणां शुल्कं दत्त्वा तया सह सुखेन वसति स्म। तस्य भक्तपत्नी कन्नगी तं बहुवारं प्रत्यागन्तुं पृष्टवती किन्तु माधवीजाले बद्धः कोवलन् न प्रत्यागतवान्।

माधवीतः तस्य मणिमेकलायः (यः द्वितीयतमिलमहाकाव्यस्य "मणिमेकलाई" इत्यस्य मुख्यनायकः अस्ति) नामकः पुत्रः अभवत्। ३ वर्षाणि यावत् कोवलनः माधव्या सह भोगसुखेषु लीनः अभवत् तथा च यदा तस्य सर्वं धनं क्षीणं जातं तदा सः स्वस्य त्रुटिं ज्ञात्वा माधवीं त्यक्त्वा पुनः कन्नगीं प्रत्यागतवान्। तेन दुःखिता माधवी सर्वधनेन सह कोवलनम् आगत्य पुनः गन्तुं प्रार्थितवती परन्तु कोवलनः पुनः गन्तुं न अस्वीकृतवान्। तदनन्तरं बहुवर्षपर्यन्तं माधवी एकाकी एव स्थिता तदनन्तरं बौद्धधर्मं स्वीकृत्य संन्यासी अभवत् इति इतिहासः कथयति।




अपरपक्षे कोवलनस्य सर्वं धनं क्षीणं जातम्, अतः सः मदुरैनगरं गत्वा नूतनव्यापारं आरभामि इति निश्चयं कृतवान्। सः स्वपत्न्या कन्नग्या सह मदुरै प्रति प्रस्थितवान्। मार्गे एकां वृद्धां साध्वीं मिलित्वा तस्याः मार्गदर्शनेन त्रयः जनाः बहु कष्टपूर्वकं मदुरै-नगरं प्राप्तवन्तः। तत्र गत्वा कोवलन् कन्नगी च गुरुहृदयेन साध्वीं विदां कृत्वा गोपालगृहे आश्रयं कृतवन्तौ। परदिने कन्नगी कोवलनं स्वस्य एकस्मिन् पादे रत्नपूर्णं नूपुरं दत्त्वा एतत् नूपुरं विक्रीय किञ्चित् सुवर्णं प्राप्य स्वव्यापारं आरभतु इति उक्तवती।

सः तस्याः नूपुरं गृहीत्वा कोवलननगरं गत्वा नूपुरं सर्वकारीयं रत्नकाराय दर्शयित्वा विक्रीतुमिच्छति इति अवदत्। तस्य नगरस्य राज्ञ्याः अपि तथैव प्रकारः नूपुरः आसीत् यः अपहृतः आसीत्। रत्नकारः तत् एव चोरितं नूपुरम् इति चिन्तयित्वा तत्रत्यं राजानं "नेडुंजेलियन" इत्यस्मै सूचितवान्। नेडुन्जेलियनः न्यायस्य कृते प्रसिद्धः आसीत्, सः कदापि कस्यचित् अन्यायं न कृतवान्। सः स्वसैनिकेभ्यः आज्ञां दत्तवान् यत् ते गत्वा पश्यन्तु यदि तस्मात् राज्ञ्याः नूपुरं प्राप्नुवन्ति तर्हि ते तस्मै मृत्युदण्डं दत्त्वा नुपुरं पुनः आनयेयुः। यदा सैनिकाः कोवलनस्य समीपे एतादृशं बहुमूल्यं नूपुरं दृष्टवन्तः तदा राज्ञः आज्ञानुसारं कोवलनस्य पक्षं न शृण्वन् तं हत्वा तं नूपुरं गृहीत्वा राजानं प्रति दत्तवन्तः। राज्ञा तदाभूषणं स्वराज्ञ्याः कृते दत्तः।

यदा कन्नगी कोवलनस्य मृत्योः वार्ताम् अवाप्तवती तदा सा क्रुद्धा राज्ञः प्रासादं प्राप्य तं ताडितवती यत् "हे नराधम! त्वया मम पत्युः सत्यं न ज्ञात्वा मृत्युदण्डः दत्तः। केन आधारेण त्वं स्वं न्याय्यपुरुषः इति वदसि?" इत्युक्ते राजा भद्रे! मम राज्ये चौराणां मृत्युदण्डस्य व्यवस्था अस्ति। कथं वदसि यत् तव पतिः चौरः नासीत्। मम भार्यायाः नुपुरं तस्य समीपे एव लब्धः। किं भवत्याः किमपि प्रमाणम् अस्ति यत् तव पतिः नूपुरं न अपहृतवान्?" कन्नगी क्रुद्धस्वरम् अवदत्, "मूर्ख! तत् नूपुरं मम आसीत् यत् मया भर्त्रे विक्रयणार्थं दत्तम् आसीत्।" इत्युक्त्वा सः द्वितीयं नूपुरं नृपाय दर्शितवती। राजा भीतः भूत्वा राज्ञ्याः तत् नूपुरं याचितवान्। सम्यक् पश्यन् ज्ञातं यत् तत् नुपुरं कन्नग्याः नूपुरस्य सदृशम् आसीत् न तु राज्ञ्याः नूपुरस्य सदृशम्। राज्ञ्याः नूपुरे मौक्तिकानि पूरितानि आसन्, कन्नग्याः नूपुरं तु रत्नैः पूर्णम् आसीत्। राजा स्वस्य त्रुटिं ज्ञात्वा लज्जया, शोकात् च कन्नग्याः पुरतः आत्महत्याम् अकरोत्।

एतदनन्तरमपि कन्नग्याः क्रोधः न शाम्यति, सा च अतीव क्रुद्धा भूत्वा अवदत्, "हे देव! यदि मया मनसि वचने च कोवलनं विहाय अन्यस्य विषये कदापि न चिन्तितम्, यदि च अहं यथार्थतया भर्तुः प्रति भक्ता अस्मि तर्हि तत्क्षणमेव ब्राह्मणान बालकान् बालिकाः प्रतिव्रतास्त्री विहाय समस्तनगरं भम्मीभूतः स्यात्। इत्युक्त्वा सा हस्ते स्थितं नूपुरं भूमौ क्षिप्तवती येन महती अग्निः प्रज्वलिता, किञ्चित्कालान्तरे एव सम्पूर्णं मदुरैनगरं भस्मरूपेण दग्धम्। मदुरै-नगरस्य भस्मनि दग्धानन्तरम् अपि यदा अग्निः न शान्तः तदा स्वयं मीनाक्षी (दक्षिणभारते पार्वतीदेव्याः रूपं मन्यते) प्रादुर्भूय कन्नग्याः-क्रोधं शान्तवती। सती कन्नगी दक्षिणभारते विशेषतः तमिलनाडुदेशे देवीरूपेण पूज्यते, "कन्नगी-अम्मा" इति नाम्ना प्रसिद्धा अस्ति। पुहार-मदुरै-नगरयोः सः मीनाक्षी-देव्याः अवतारः अपि मन्यते। न केवलम् एतत्, श्रीलङ्कादेशे अपि तस्य महती मान्यता अस्ति। एषा कथा भक्तायाः पतिव्रताबलं दर्शयति। सती अनुसुया इव कन्नगी देवी सदा पूज्या तिष्ठति।

✍हिमसंस्कृतवार्ताः,
डॉ.अमनदीपशर्मा

